द्वितीयः पाठः

CCS1SR

# पुनरावलोकनम्-2

पुंल्लिङ्गम

**एकवचनम्**



एषः कः ?

एषः छात्रः।

एषः किं करोति ?

एषः छात्रः पुस्तकं पठति।

**द्विवचनम्**



एतौ कौ ?

एतौ गजौ।

एतौ किं कुरुतः?

एतौ गजौ जलं पिबतः।

**बहुवचनम्**



एते के ?

एते कपोताः।

एते किं कुर्वन्ति?

एते कपोताः तण्डुलान् खादन्ति।

स्त्रीलिङ्गम्

**एकवचनम्**

एषा का?

एषा बालिका।

एषा किं करोति?

एषा बालिका अम्बां नमति।



**द्विवचनम्**

एते के?

एते अजे।

एते किं कुरुतः ?

एते अजे घासं चरतः।



**(ख) 'युष्मद्-अस्मद्'-शब्दः**

(मध्यमपुरुषः उत्तमपुरुषः च)

**अध्यापकः** - हे बालक! त्वं किं पठसि?

**बालकः-** श्रीमन्! अहम् इतिहासं पठामि।

**अध्यापकः-** हे बालकौ! युवां किं पठथः?

**बालकौ-** आवां संस्कृतभाषां पठावः।

**अध्यापकः-** शोभनम्। इयं भाषा सरला मधुरा च अस्ति।

**अध्यापकः-** हे बालकाः! यूयं किं पठथ?

**बालकाः-** श्रीमन्! वयं विज्ञानं पठामः।

**अध्यापकः-** बाढम्। विज्ञानं जीवने आवश्यकं भवति।

जानीथ! पठनेन ज्ञानं भवति क्रीडनेन च शरीरं स्वस्थंभवति।

**बालकाः-** आम् श्रीमन्! वयं मनोयोगेन पठामः, स्नेहेन खेलामः,

सदा प्रसन्नाः च भवामः।

एषः = यह ( पुंल्लिङ्गम् ) एषा = यह ( स्त्री0 ) एतत् = यह (नपुंसक0)

एतौ = ये दोनों ( “ ) एते = ये दोनों ( “ ) एते=ये दोनों ( “ )

एते = ये सब ( “ ) एताः = ये सब ( “ ) एतानि= ये सब ( “ )

त्वम् = तुम (तीनों लिङ्ग) युवाम् = तुम दोनों (तीनों लिङ्ग) यूयम्=तुम सब (तीनों लिङ्ग)

अहम् = मैं ( “ ) आवाम् = हम दोनों ( “ ) वयम्=हम सब ( “ )

**1. सर्वनामशब्दानां प्रयोगं पश्यत-**

(क) छात्रः पठति। (ख) अश्वाः धावन्ति।

कः पठति? ते धावन्ति।

(ग) छात्रा वदति। (घ) बालकः नमति।

सा वदति। एषः नमति।

अभ्यासः

**विशेष**-(क) किसी व्यक्ति, वस्तु, स्थान तथा गुण अथवा भाव के नाम को संज्ञा कहते हैं, जैसे- बालक, कलम, प्रयाग, सुन्दरता, कोमलता आदि।

(ख) संज्ञा के स्थान पर जिन शब्दों का प्रयोग किया जाता है उन्हें सर्वनाम कहते हैं, जैसे- वह, यह, कौन, मैं, तुम, आदि।

बालक जाता है। वह जाता है।

(संज्ञा) (सर्वनाम)

(ङ) पत्रं पतति। (च) बालकौ गच्छतः।

तत् पतति। तौ गच्छतः।

2-सर्वनामपदैः सह उचितक्रियापदानां प्रयोगंकुरुत-

सर्वनाम-पदम् क्रिया-पदम्

यथा- एषा पठति

एषः गच्छन्ति

एतौ धावतः

एताः पतति

एतत् नमतः

एते खेलति

**विशेष-**

1. एषः गजः गच्छति।

2. ताः बालिकाः पठन्ति।

3. इमानि फलानि मधुराणि सन्ति।

उपर्युक्त की भाँति आपने पढ़ा कि संज्ञापदों के साथ भी सर्वनामपदों का प्रयोग होता है। यह ध्यान रहे, संज्ञापदों में जो लिङ्ग और वचन होता है उसी लिङ्ग और वचन में सर्वनामपदों का प्रयोग किया जाता है। इस प्रकार सर्वनाम में भी तीनों लिङ्ग और तीनों वचन होते हैं।

3. **चित्रानुसारं संस्कृते उत्तरत-**

एतौ कौ ?



एताः किं कुर्वन्ति ?



एतानि कानि सन्ति?



4. **मध्यमपुरुषस्य 'क्रियायाः' प्रयोगं कुरुत-**

(क) त्वम् ..... । (लिख्) (ख) युवाम् ..... । (पठ्) (ग) यूयम् ......। (धाव्)

**5. उत्तमपुरुषस्य 'कर्तुः' प्रयोगं कुरुत-**

(क) ....... शिक्षकं नमामि। (ख) ....... पुस्तकं पठावः। (ग) ...... भोजनं कुर्मः।

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) मैं खेलता हूँ। (ख) हम सब खाते हैं। (ग) वह हँसती है।

(घ) तुम दोनों लिखते हो। (ङ.) वे बालिकाएँ हैं। (च) यह फल गिरता है।

**(क)मंजूषासहाय्येन वाक्यानि रचयत-**

पु0- बालकः/सः/एषः/कः गच्छति

स्त्री0- बालिका/सा/एषा/का गमिष्यति

नपुं0- वाहनम्/तत्/एतत्/किम् गच्छतु

यथा- बालकः गच्छति।

...............................

...........................

शिक्षकः अनेन प्रकारेण अन्यानपि अभ्यासान् कारयेत्।

**शिक्षण-सङ्केतः**

(क) पाठे आगतानां सर्वनामशब्दानाम् अभ्यासं परिशिष्टभागात् कारयत।

(ख) वाक्यानां वाचनं तथा लघु-संस्कृतवाक्यानां सहायतया प्रश्नोत्तराणां गतिविधिं कारयत।

'विद्या ददाति विनयम्